नं० ८१८-घ
धर्मविवेकः (अपूर्णः)

नं० ८१८-घ
पत्रम् १ (एकम्) (काव्यम्)

818
धर्मविवेक
N. A.
अपूर्ण
काव्यम्
१२-२-९३

॥ ॐ ॥ श्रद्धावीजो विप्रवेदांवुसिक्तः शाखा विद्यास्तस्याश्रनस्रो दशापि।
पुण्यापत्यथा द्वे फले स्थूलसूक्ष्मे मोक्षः कामो धर्मवृक्षोयमोजः॥ १॥ यातः क्ष्मामखिलां प्रदा
यहरये पातालमूलं वलिः शक्रप्रस्थविसर्जनात्स च मुनिः स्वर्गं समारोपितः। आवाल्यादस
ती सती सुरपुरीं कुंतीमसमारोहयत् हा सीतापतिदेवनागमदथो धर्मस्य सूक्ष्मा गतिः॥ २॥
कानीनस्य मुनेः स्ववांधववधूवैधव्यविध्वंसिनो नेतारः खलु गोलकस्य तनयाः कुंडाः स्वयं
पांडवाः। तेमी पंच समानयोनिरतयः तेषां गुणोत्कीर्तनात् अक्षय्यं सुकृतं भवेदविकलं ध
र्मस्य सूक्ष्मा गतिः॥ ३॥ आहारेष्वशुचिता ध्वनौ मधुरता नीडे पराधीनता बंधौ निर्ममता वने रसि
कता वाचालता माधवे। यस्यैते गुणराशयः पिकवरं तस्मात्किमेते जना वन्दन्ते खलु खंजनं न
कृमिभुजं चित्रा गतिः कर्मणां॥ ४॥ कान्तं वक्ति कपोतिकाकुलतया नाथांतकालोधुना व्या
धो धृतचापशानितशरः श्येनः परिभ्राम्यति। इत्थं सत्यहिना स दष्ट इषुणा श्येनोपि तेनाहतस्
तूर्णं तौ नु यमालयं प्रति गतौ दैवी विचित्रा गतिः॥ ५॥ कुंठी गोखुरयोर्विचार्य मनसा कल्काशने

धर्मवि वेकः १२

यन्मया प्रोक्तं तद्दीयपरीतकं कृतमहो गोःखुरमात्रं ददौ। नार्थी मत्स्वजनालये न च सखं नावा
यशो लभ्यते सद्वैद्येक विभूषणौ हरिहरे लाभः परं गोवधः ॥६॥ पंचास्यस्य पराभवाय
भषको मांसेन गोर्भूयसा दुग्धान्नैरपि पायसैः प्रतिदिनं संवर्द्धितो यो मया। सोऽयं सिंह
रवाद्गृहान्नरगमद्भीत्याकुलः सम्भ्रमाद् हन्ताशा विलयं गता हविषे लाभः परं गोवधः ॥७॥
पारीन्द्रस्य पराभवाय सरभीमामेनद्दुर्मेधसा पुष्यंते किल पीवराकुटगिरः स्थानः प्रयत्नाद
मी। नत्वेतन्मदमत्तवारणचमूविद्रावणः केशरी जेतव्यो भवता किरातनृपते लाभः प
रं गोवधः ॥८॥ एका भूरुभयोरेकामुभयोरीलकाउयोः। यथा लिशपामाकयोर्भेदः फलेन
परिचीयते ।९। जातः सूर्यकुले पिता दशरथः क्षोणीभुजामग्रणीः सीता सत्यपराय
णा प्रणयिनी यस्यानुजो लक्ष्मणः। दोर्दण्डेन समो न चास्ति भुवने प्रत्यक्षविष्णुः स्वयं
रामो येन विडम्बितोपि विधिना चान्ये परे का कथा ।१०। एका भार्या प्रकृतिमखरा चंच
ला च द्वितीया पुत्रस्त्वेको भुवनविजयी मन्मथो दुर्निवारः शेषः शय्या शयनमुदधौ वाह